। च नमः । नमस्तीर्थ्याय । तीर्थ्याय च । च कूल्याय । कूल्याय च । च नमः । नमः पार्याय । पार्याय च । चावार्याय । अवार्याय च । च नमः । नमः प्रतरणाय । प्रतरणाय च । प्रतरणायेति प्र-तरणाय । चोत्तरणाय । उत्तरणाय च । उत्तरणायेत्युत्-तरणाय । च नमः । नम आतार्याय । आतार्याय च । आतार्यायेत्या-तार्याय । चालाद्याय । आलाद्याय च । आलाद्यायेत्या-लाद्याय । च नमः । नमः शष्प्याय । शष्प्याय च । च फेन्याय ।

फेन्याय च । च नमः । नमः सिकत्याय । सिकत्याय च । च प्रवाह्याय । प्रवाह्याय च । पवाह्यायेति प्र-वाह्याय । चेति च () ॥॥

काण्ड -4, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

नमः हरिण्याय । हरिण्याय च । च प्रपथ्याय । प्रपथ्याय च । प्रपथ्यायेति प्र-पथ्याय । च नमः । नमः किꣳशिलाय । किंगꣳशिलाय च । च क्षयणाय । क्षयणाय च । च नमः । नमः कपर्दिने । कपर्दिने च । च पुलस्तये । पुलस्तये च । च नमः । नमो गोष्ठ्याय । गोष्ठ्याय च । गोष्ठ्यायेति गो-स्थ्याय । च गृह्याय । गृह्याय च । च नमः । नम स्तल्प्याय । तल्प्याय च । च गेह्याय । गेह्याय च । च नमः । नमः काट्याय । काट्याय च । च गह्वरेष्ठाय । गह्वरेष्ठाय च । गह्वरेष्ठायेति गह्वरे-स्थाय । च नमः । नमो हृदय्याय । हृदय्याय च । च निवेष्प्याय । निवेष्प्याय च । निवेष्प्यायेति नि-वेष्प्याय । च नमः । नमः पाꣳसव्याय । पाꣳसव्याय च । च रजस्याय । रजस्याय च । च नमः । नमः शुष्क्याय । शुष्क्याय च । च हरित्याय । हरित्याय च । च नमः । नमो लोप्याय । लोप्याय च । चोलप्याय । उलप्याय च ()

काण्ड -4, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। च नमः । नमः ऊर्व्याय । ऊर्व्याय च । च सूर्म्याय । सूर्म्याय च । च नमः । नमः पर्ण्याय । पर्ण्याय च । च पर्णशद्याय । पर्णशद्याय च । पर्णशद्यायेति पर्ण-शद्याय । च नमः । नमोऽपगुरमाणाय । अपगुरमाणाय च । अपगुरमाणायेत्यप गुरमाणाय । चाभिघ्नते । अभिघ्नते च । अभिघ्नत इत्यभि-घ्नते । च नमः । नमः आक्खिदते । आक्खिदते च । आक्खिदत इत्याँ-खिदते । च पक्खिदते । प्रक्खिदते च । प्रक्खिदत इति प्र-खिदते । च नमः ।

नमो॑ वः । वः किरिकेभ्यः । किरिकेभ्यो देवानाँ । देवानाꣳ हृदयेभ्यः । हृदयेभ्यो नमः । नमो विक्षीणकेभ्यः । विक्षीणकेभ्यो नमः । विक्षीणकेभ्य इति विक्षीण-केभ्यः । नमो विचिन्वत्केभ्यः । विचिन्वत्केभ्यो नमः । विचिन्वत्केभ्य इति वि-चिन्वत्केभ्यः । नम आनिर्हतेभ्यः । आनिर्हतेभ्यो नमः । आनिर्हतेभ्य इत्यानिः-हतेभ्यः । नम आमीवत्केभ्यः । आमीवत्केभ्य इत्याँ-मीवत्केभ्यः () ॥॥

काण्ड -4, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

द्रापे अंधसः । अंधसस्पते । पते दरिद्रन् । दरिद्रन्नीललोहित । नीललोहितेति नील-लोहित । एषां पुरुषाणां । पुरुषाणामेषां । एषां पशूनां । पशूनां मा । मा भेः । भे र्मा । माऽरः । अरो मो । मो एषां । मो इति मो । एषां किं । किं चन । चनाऽऽमममत् । या ते । आममदित्याममत् ॥ ते रुद्र । रुद्रशिवा । शिवा तनूः । तनूः शिवा । शिवा विश्वाहभेषजी । विश्वाहभेषजीति विश्वाह-भेषजी ॥ शिवा रुद्रस्य । रुद्रस्य भेषजी । भेषजी तयाँ । तया नः । नो मृड । मृड जीवसे । जीवस इति जीवसे । इमाꣳ रुद्राय । रुद्राय तवसे । तवसे कपर्दिने । कपर्दिने क्षयद्वीराय । क्षयद्वीराय प्र । क्षयद्वीरायेति क्षयत्-वीराय । प्रभरामहे । भरामहे मतिम् । मतिमिति मतिम् ॥ यथा नः । नः शम् । शमसत् । असद्विपदे । द्विपदे चतुष्पदे । द्विपद इति द्वि-पदे । चतुष्पदे विश्वँ । चतुष्पद इति चतुः-पदे । विश्वं पुष्टम् । पुष्टं ग्रामे । ग्रामे अस्मिन् ()

काण्ड -4, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। अस्मिन्ननातुरम् । अनातुरमित्यनाँ-तुरम् ॥ मृडा नः । नो रुद्र । रुद्रो । उत नः । नो मयः । मयस्कृधि । कृधि क्षयद्वीराय । क्षयद्वीराय नमसा । क्षयद्वीरायेति क्षयत्-वीराय । नमसा विधेम । विधेम ते । त इति ते ॥ यच्छं । शं

चं । च योः । योश्च । च मनुः । मनुरायजे । आयजे पिता । आयज इत्या-यजे । पिता तत् । तदश्याम । अश्याम तवं । तव रुद्र । रुद्र प्रणीतौ । प्रणीताविति प्र-नीतौ ॥ मा नः । नो महान्तं । महांत मुत । उत मा । मा नः । नो अर्भकं । अर्भकं मा । मा नः । न उक्षंतं । उक्षंतमुत । उत मा । मा नः । न उक्षितं । उक्षित-मित्युक्षितं ॥ मा नः । नो वधीः । वधीः पितरं । पितरं मा । मोत । उत मातरं । मातरं प्रियाः । प्रिया मा । मा नः । नस्तनुवः ()

काण्ड -4, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। तनुवो रुद्र । रुद्र रीरिषः । रीरिष इतिं रीरिषः ॥ मा नः । न स्तोके । तोके तनये । तनये मा । मा नः । न आयुषि । आयुषि मा । मा नः । नो गोषु । गोषु मा । मा नः । नो अश्वेषु । अश्वेषु रीरिषः । रीरिष इतिं रीरिषः ॥ वीरान्मा । मानः । नो रुद्र । रुद्र भामितः । भामितो वधीः । वधीर् हविष्मंतः । हविष्मंतो नमसा । नमसा विधेम । विधेम ते । त इतिं ते ॥ आरात्तें । ते गोघ्ने । गोघ्न उत । गोघ्न इतिं गो-घ्ने । उत पूरुषघ्ने । पूरुषघ्ने क्षयद्वीराय । पूरुषघ्न इतिं पूरुष-घ्ने । क्षयद्वीराय सुम्नम् । क्षयद्वीरा येतिं क्षयत्-वीराय । सुम्नमस्मे । अस्मे तैं । अस्मे इत्यस्मे । ते अस्तु । अस्त्वित्यस्तु ॥ रक्षा च । च नः । नो अधिं । अधिं च । च देव । देव ब्रूहि । ब्रूह्यधं । अधा च । च नः । नः शर्म । शर्म यच्छ । यच्छ द्विबर्हाः । द्विबर्हा इतिं द्वि-बर्हाः ॥ स्तुहि श्रुतं ()

काण्ड -4, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। श्रुतं गर्तसदं । गर्तसदं युवानं । गर्तसदमितिं गर्त-सदं । युवानं मृगं । मृगं न । न भीमम् । भीममुपहब्दुम् । उपहब्दुमुग्रम् । उग्रमित्युग्रम् ॥ मृडा जरित्रे । जरित्रे रुद्र । रुद्र स्तवानः । स्तवानो अन्यं । अन्यं तैं । ते अस्मत् । अस्मन्नि । नि वपंतु । वपंतु सेनाः । सेना इति सेनाः ॥ परिणः । नो रुद्रस्य । रुद्रस्य हेतिः । हेतिर्वृणक्तु । वृणक्तु

परि॑ । परि॑ ह्वेषस्य । ह्वेषस्य॑ दुर्मतिः । दुर्मतिरघा॑योः । दुर्मतिरिति॑ दुः-मतिः । अघा॑योरित्यघ-योः ॥ अव॑ स्थिरा । स्थिरा मघव॑द्भ्यः । मघव॑द्भ्यस्तनुष्व । मघव॑द्भ्य इति॑ मघव॑त्-भ्यः । तनुष्व मीढ्वः॑ । मीढ्व॑स्तो॒काय॑ । तो॒काय॒ तन॑याय । तन॑याय मृडय । मृड॒येति॑ मृडय ॥ मीढु॑ष्टम शिव॑तम । मीढु॑ष्टमेति॒ मीढु॑ः-तम॒ । शिव॑तम शि॒वः । शिव॑तमेति॒ शिव॑-तम॒ । शि॒वो नः॑ । नः॒ सु॒मना॑ः । सु॒मना॑ भव । सु॒मना॒ इति॑ सु-मना॑ः । भ॒वेति॑ भव ॥ पर॒मे वृ॒क्षे । वृ॒क्ष आयु॑धं । आयु॑धं नि॒धाय॑ । नि॒धाय॒ कृत्ति॑ं । नि॒धाये॑ति॑ नि-धाय॑ । कृत्ति॒ं वसा॑नः । वसा॑न॒ आ । आ च॑र । च॒र॒ पिना॑कं ()

काण्ड -4, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। पिना॑कं॒ बिभ्र॑त् । बिभ्र॒दा । आ ग॑हि । ग॒हीति॑ गहि ॥ विकि॑रिद॒ विलो॑हित । विकि॑रि॒देति॒ वि-कि॒रि॒द॒ । विलो॑हि॒त॒ नमः॑ । विलो॑हि॒तेति॒ वि-लो॒हि॒त॒ । नमः॑ ते । ते अ॒स्तु॒ । अ॒स्तु॒ भ॒गवः॑ । भ॒गव॒ इति॑ भग-वः॒ ॥ यास्ते॑ । ते॒ स॒हस्र॑ं । स॒हस्र॑ꣳ हे॒तयः॑ । हे॒तयो॒ऽन्यं । अ॒न्यम॒स्मत् । अ॒स्मन्नि । नि व॑पंतु । व॒पं॒तु॒ ताः । ता इति॒ ताः ॥ स॒हस्रा॑णि सहस्र॒धा । स॒हस्र॒धा बा॑हु॒वोः । स॒हस्र॒धेति॑ सहस्र-धा । बा॒हु॒वोस्तव॑ । तव॑ हे॒तयः॑ । हे॒तय॒ इति॑ हे॒तयः॑ ॥ तासा॒- मीशा॑नः । ईशा॑नो भगवः । भ॒गवः॒ परा॑चीना॑ । भ॒गव॒ इति॑ भग-वः॒ । परा॑चीना॒ मुखा॑ । मुखा॑ कृधि । कृ॒धीति॑ कृधि () ॥॥

काण्ड -4, प्रपाठक -5, अनुवाक -11, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

स॒हस्रा॑णि सहस्र॒शः । स॒हस्र॒शो ये । स॒हस्र॒श इति॑ सहस्र-शः । ये रु॒द्राः । रु॒द्रा अधि॑ । अधि॒ भूम्या॑म् । भूम्या॒मिति॒ भूम्या॑म् ॥ तेषा॑ꣳ सहस्र-योज॒ने । स॒हस्र॒योज॒नेऽव॑ । स॒हस्र॒योज॒न इति॑ सहस्र-योज॒ने । अव॒ धन्वा॑नि । धन्वा॑नि तन्मसि । त॒न्म॒सी॒ति॑ तन्मसि ॥ अ॒स्मिन्म॑हति । म॒हत्य॑र्ण॒वे । अ॒र्ण॒वे॑ऽ॒न्तरि॑क्षे । अ॒न्तरि॑क्षे भ॒वाः । भ॒वा अधि॑ । अधी॒त्यधि॑ ॥ नील॑ग्रीवाः शि॒ति॒कं॒ठा॑ः । नील॑ग्रीवा॒ इति॒ नील॑-ग्रीवाः । शि॒ति॒कं॒ठा॑ः शर्वाः । शि॒ति॒कं॒ठा॒ इति॑ शिति-कं॒ठा॑ः ।

शर्वा अधः, । अधः, क्षमाचराः । क्षमाचरा इति क्षमाचराः ॥ नीलग्रीवाः शितिकण्ठाः । नीलग्रीवा इति नील-ग्रीवाः । शितिकण्ठा दिवम् । शितिकण्ठा इति शिति- कण्ठाः । दिवꣳ रुद्राः । रुद्रा उपश्रिताः । उपश्रिता इत्युप-श्रिताः ॥ ये वृक्षेषु । वृक्षेषु सस्पिञ्जराः । सस्पिञ्जरा नीलग्रीवाः । नीलग्रीवा विलोहिताः । नीलग्रीवा इति नील-ग्रीवाः । विलोहिता इति वि-लोहिताः ॥ ये भूतानाम् । भूतानामधिपतयः । अधिपतयो विशिखासः । अधिपतय इत्यधि-पतयः । विशिखासः कपर्दिनः । विशिखास इति वि-शिखासः । कपर्दिन इति कपर्दिनः ॥ ये अन्नेषु । अन्नेषु विविध्यन्ति । विविध्यन्ति पात्रेषु । विविध्यन्तीति वि-विध्यन्ति । पात्रेषु पिबतः । पिबतो जनान् । जनानिति जनान् ॥ ये पथाम् । पथां पथिरक्षयः । पथिरक्षय ऐलबृदाः । पथिरक्षय इति पथि-रक्षयः । ऐलबृदा यव्युधः । यव्युध इति यव्युधः ॥ ये तीर्थानि ()

काण्ड -4, प्रपाठक -5, अनुवाक -11, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। तीर्थानि प्रचरन्ति । प्रचरन्ति सुकावन्तः । प्रचरन्तीति प्र-चरन्ति । सुकावन्तो निषङ्गिणः । सुकावन्त इति सुका-वन्तः । निषङ्गिण इति नि-सङ्गिनः ॥ य एतावन्तः । एतावन्तश्च । च भूयाꣳसः । भूयाꣳसश्च । च दिशः । दिशो रुद्राः । रुद्रा वितस्थिरे । वितस्थिर इति वि- तस्थिरे ॥ तेषाꣳ सहस्रयोजने । सहस्रयोजनेऽवं । सहस्रयोजन इति सहस्र-योजने । अव धन्वानि । धन्वानि तन्मसि । तन्मसीति तन्मसि ॥ नमो रुद्रेभ्यः । रुद्रेभ्यो ये । ये पृथिव्यां । पृथिव्यां ये । यैऽन्तरिक्षे । अन्तरिक्षे ये ये दिवि । दिवि येषाम् । येषामन्न । अन्नं वातः । वातो वर्?षम् । वर्?षमिषवः । इषवस्तेभ्यः । तेभ्यो दश । दश प्राचीः । प्राचीर्दश । दश दक्षिणा । दक्षिणा दश । दश प्रतीचीः । प्रतीचीर्दश । दशो दीचीः । उदीची-र्दश । दशोर्ध्वाः । ऊर्ध्वास्तेभ्यः । तेभ्यो नमः । नमस्ते । ते नः । नो मृडयन्तु । मृडयन्तु ते । ते यं । यं द्विष्मः । द्विष्मो यः । यश्च । च नः । नो द्वेष्टि । द्वेष्टि तं । तं वः । वो जम्भे । जम्भे दधामि । दधामीति दधामि () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

॥ इति चतुर्थकांडे पंचमप्रश्नस्य क्रमपाठः समाप्तः ॥ क्रमपाठः अश्मन्नूर्जं । ऊर्जं पर्वते । पर्वते शिश्रियाणां । शिश्रियाणां वातै । वाते पर्जन्यै । पर्जन्ये वरुणस्य । वरुणस्य शुष्मै । शुष्म इति शुष्मै ॥ अद्भ्य ओषधीभ्यः । अद्भ्य इत्यत्-भ्यः । ओषधीभ्यो वनस्पतिभ्यः । ओषधीभ्य इत्योषधि-भ्यः । वनस्पतिभ्योऽधि । वनस्पतिभ्य इति वनस्पति-भ्यः । अधि संभृतां । संभृतां तां । संभृतामिति सं-भृताम् । तां नः । न इषे । इषमूर्जं । ऊर्जं धत्त । धत्तमरुतः । मरुतः सꣳरराणाः । सꣳरराणा इति सं-रराणाः ॥ अश्मग्गंस्ते । ते क्षुत् । क्षुदमुं । अमुं तै । ते शुक् । शुगृच्छतु । ऋच्छतु यं । यं द्विष्मः । द्विष्म इति द्विष्मः ॥ समुद्रस्य त्वा । त्वाऽवाकया । अवाकयाऽग्नै । अग्ने परि । परिव्ययामसि । व्ययामसीति व्ययामसि ॥ पावको अस्मभ्यं । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म-भ्यं । शिवो भव । भवेति भव ॥ हिमस्य त्वा । त्वा जरायुणा । जरायुणाऽग्नै । अग्ने परि । परिव्ययामसि । व्ययामसीति व्ययामसि ॥ पावको अस्मभ्यं । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म-भ्यं । शिवो भव । भवेति भव ॥ उपज्मन् ()

काण्ड -4, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। ज्मन्नुप । उपवेतसे । वेतसेऽवत्तरं । अवत्तरं नदीषु । अवत्तरमित्यवत्-तरं । नदीष्वा । एत्या ॥ अग्नै पित्तं । पित्तमपां । अपामसि । असीत्यसि ॥ मंडूकि ताभिः । ताभिरा । आ गहि । गहि सा । सेमं । इमन्नः । नो यज्ञम् । यज्ञमिति यज्ञम् ॥ पावकवर्णꣳ शिवं । पावकवर्णमिति पावक-वर्णम् । शिवं कृधि । कृधीति कृधि ॥ पावक आ । आचितयत्या । चितयत्या कृपा । कृपेति कृपा ॥ क्षामनुरुचे । रुरुच उपसः । उपसो न । न भानुना । भानुनेति भानुना ॥ तूर्वन्न । न यामन्न् । यामन्नेतशस्य । एतशस्य नु । नूरणै । रण आ । आ यः । यो घृणे । घृण इति घृणे ॥ न ततृषाणः । ततृषाणो अजरः । अजर इत्यजरः ॥ अग्नै पावक । पावक रोचिषा । रोचिषा मंद्रया । मंद्रया देव । देव जिह्वया । जिह्वयेति जिह्वया ॥ आ देवान् ()

काण्ड -4, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। देवान् वक्षि । वक्षि यक्षि । यक्षि च । चेति च ॥ स नः । नः पावक । पावक दीदिवः । दीदिवोऽग्ने । अग्ने देवान् । देवाꣳ इह । इहा । आवह । वहेति वह ॥ उप यज्ञं । यज्ञꣳ हविः । हविश्च । च नः । न इति नः ॥ अपामिदं । इदं न्ययनं । न्ययनꣳ समुद्रस्य । न्ययनमिति नि- अयनम् । समुद्रस्य निवेशनम् । निवेशनमिति नि- वेशनम् ॥ अन्यं तै । ते अस्मत् । अस्मत्तपंतु । तपंतु हेतयः । हेतयः पावकः । पावको अस्मभ्यं । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म-भ्यं । शिवो भव । भवेति भव ॥ नमस्ते । ते हरसे । हरसे शोचिषे । शोचिषे नमः । नमस्ते । ते अस्तु । अस्त्वर्चिषे । अर्चिष इत्यर्चिषे । अन्यं तै । ते अस्मत् । अस्मत्तपंतु । तपंतु हेतयः । हेतयः पावकः । पावको अस्मभ्यं । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म-भ्यं । शिवो भव । भवेति भव ॥ नृषदेवट् ()

काण्ड -4, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। नृषद इति नृ-सदै । वडप्सुषदै । अप्सुषदे वट् । अप्सुषद इत्यप्सु-सदै । वड्वनसदै । वनसदे वट् । वनसद इति वन-सदै । वड्बर्हिषदै । बर्हिषदे वट् । बर्हिषद इति बर्हि-सदै । वटथ्सुवर्विदै । सुवर्विदे वट् । सुवर्विद इति सुवः-विदै । वडिति वट् ॥ ये देवाः । देवा देवानाँ । देवानाँ यज्ञियाः । यज्ञिया यज्ञियानां । यज्ञियानाꣳ संवथ्सरीणँ । संवथ्सरीणमुप । संवथ्सरीणमिति सं- वथ्सरीणँ । उप भागं । भागमासते । आसत इत्यासते ॥ अहुतादो हविषः । अहुताद इत्यहुत-अदः । हविषो यज्ञे । यज्ञे अस्मिन् । अस्मिन्थ्स्वयं । स्वयं जुहुध्वं । जुहुध्वं मधुनः । मधुनो घृतस्य । घृतस्येति घृतस्य ॥ ये देवाः । देवा देवेषु । देवेष्वधि । अधि देवत्वं । देवत्वमायन्, । देवत्वमिति देव-त्वं । आयन्, ये । ये ब्रह्मणः । ब्रह्मणः पुर?एतारः । पुरएतारो अस्य । पुरएतार इति पुरः-एतारः । अस्येत्यस्य ॥ येभ्यो न । नर्ते ।

ऋते पवते । पवते धाम । धाम किं । किं चन । चन न । न ते । ते दिवः । दिवो न । न पृथिव्याः । पृथिव्या अधि । अधि स्रुपु । स्रुष्विति स्रुपु ॥ प्राणदा अपानदाः । प्राणदा इति प्राण-दाः । ()

काण्ड -4, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

अपानदा व्यानदाः । अपानदा इत्यपान-दाः । व्यानदाश्चक्षुर्दाः । व्यानदा इति व्यान-दाः । चक्षुर्दा वर्चोदाः । चक्षुर्दा इति चक्षुः-दाः । वर्चोदा वरिवोदाः । वर्चोदा इति वर्चः-दाः । वरिवोदा इति वरिवः-दाः । अन्यं तै । ते अस्मत् । अस्मत्तपतु । तपतु हेतयः । हेतयः पावकः । पावको अस्मभ्यँ । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म-भ्यं । शिवो भव । भवेति भव ॥ अग्निस्तिग्मेन । तिग्मेन शोचिषा । शोचिषा यꣳसत् । यꣳसद्विश्वँ । विश्वं नि । न्यत्रिणँ । अत्रिणमित्यत्रिणँ ॥ अग्निर्नः । नो वꣳसते । वꣳसते रयिं । रयिमिति रयिं ॥ सेना । एनाऽनीकेन । अनीकेन सुविदत्रः । सुविदत्रो अस्मे । सुविदत्र इति सु-विदत्रः । अस्मे यष्टाँ । अस्मे इत्यस्मे । यष्टा देवान् । देवाꣳ आयजिष्ठः । आयजिष्ठः स्वस्ति । आयजिष्ठ इत्या-यजिष्ठः । स्वस्तीति स्वस्ति । अदब्धो गोपाः । गोपा उत । गोपा इति गो- पाः । उत नः । नः परस्पाः । परस्पा अग्नै । परस्पा इति परः-पाः । अग्नैद्युमत् । द्युमदुत । द्युमदिति द्यु-मत् । उत रेवत् । रेवदिदीहि । दिदीहीति दिदीहि () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

य इमा । इमा विश्वाँ । विश्वा भुवनानि । भुवनानि जुह्वत् । जुह्वदृषिः । ऋषिर् होताँ । होता निषसादं । निषसादा पिता । निषसादेति नि-ससादं । पिता नः । न इति नः ॥ स आशिषाँ । आशिषा द्रविणं । आशिषेत्याँ-शिषाँ । द्रविणमिच्छमानः । इच्छमानः परमच्छदः । परमच्छदो वरै । परमच्छद इति परम-छदः । वर आ । आ विवेश ।

विवेशेति विवेश ॥ विश्वकर्मा मनसा । विश्वकर्मेति विश्व-कर्मा । मनसा यत् । यद्विहायाः । विहाया धाता । विहाया इति वि-हायाः । धाता विधाता । विधाता परमा । विधातेति वि-धाता । परमोत । उत सन्दृक् । संदृगिति सं-दृक् ॥ तेषामिष्टानि । इष्टानि सं । समिषा । इषा मदंति । मदंति यत्र । यत्र सप्तर्?षीन् । सप्तर्?षीन् परः । सप्तर्षीनिति सप्त-ऋषीन् । पर एकँ । एकमाहुः । आहुरित्याहुः ॥ यो नः । नः पिता । पिता जनिता । जनिता यः । यो विधाता । विधाता यः । विधातेति-धाता । यो नः । नः सतः । सतो अभि । अभ्या । आसत् । सञ्जजान । जजानेति जजान () ॥

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

यो देवानाँ । देवानाँ नामधाः । नामधा एकः । नामधा इति नाम-धाः । एक एव । एव तं । तꣳ संप्रश्नं । संप्रश्नं भुवना । संप्रश्नमिति सं-प्रश्नम् । भुवना यंति । यंत्यन्या । अन्येत्यन्या ॥ त आ । आ यजन्त । अयजंत द्रविणं । द्रविणꣳ सं । समस्मे । अस्मा ऋषयः । ऋषयः पूर्वे । पूर्वे जरितारः । जरितारो न । न भूना । भूनेति भूना ॥ असूर्ता सूताँ । सूर्ता रजसः । रजसो विमानैँ । विमाने ये । विमान इति वि-मानैँ । ये भूतानि । भूतानि समकृण्वन् । समकृण्वन्निमानि । समकृण्वन्निति सं-अकृण्वन् । इमानीतीमानि ॥ न तं । तं विधाथ । विदाथ यः । य इदं । इदं जजान । जजानान्यत् । अन्यद्युष्माकँ । युष्माकमंतरं । अंतरं भवाति । भवातीति भवाति ॥ नीहारेण प्रावृताः । प्रावृता जल्प्याँ । जल्प्या च । चासुतृपः । असुतृपं उक्थशासः । असुतृप इत्यसु-तृपः । उक्थशासश्चरंति । उक्थशास इत्युक्थ-शासः । चरंतीति चरंति ॥ परो दिवा । दिवा परः । पर एना ()

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। एना पृथिव्या । पृथिव्या परः । परो देवेभिः । देवेभिरसुरैः । असुरैर्गुहा॑ । गुहा यत् । यदिति यत् ॥ कꣳस्वित् । स्विद्गर्भं । गर्भं प्रथमं । प्रथमं दध्रे । दध्र आपः । आपो यत्र॑ । यत्र॑ देवाः । देवाः समगच्छंत । समगच्छंत विश्वे॑ । समगच्छंतेति॑ सं-अगच्छंत । विश्व इति॒ विश्वे॑ ॥ तमित् । इद्गर्भं । गर्भं प्रथमं । प्रथमं दध्रे । दध्र आपः । आपो यत्र॑ । यत्र॑ देवाः । देवाः समगच्छंत । समगच्छंत विश्वे॑ । समगच्छंतेति॑ सं-अगच्छंत । विश्व इति॒ विश्वे॑ ॥ अजस्य॒ नाभौ॑ । नाभावधि॑ । अध्येक॑म् । एकमर्पितं । अर्पितं॒ यस्मिन्न्॑ । यस्मिंन्निदं॑ । इदं विश्वं॑ । विश्वं॒ भुवनं । भुवनमधि॑ । अधि॑ श्रितम् । श्रितमिति॑ श्रितम् ॥ विश्वकर्मा॑ हि । विश्व-कर्मेति॑ विश्व-कर्मा॑ । ह्यजनिष्ट । अजनिष्ट देवः । देव आत् । आदित् । इद्गंधर्वः । गंधर्वो अभवत् । अभवद्द्वितीयः । द्वितीय इति॑ द्वितीयः ॥ तृतीयः॑ पिता । पिता जनिता । जनितौषधीनां ()

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। ओषधिनामपां । अपां गर्भं । गर्भं वि । व्यदधात् । अदधात् पुरुत्रा । पुरुत्रेति॑ पुरु-त्रा ॥ चक्षुषः॑ पिता । पिता मनसा । मनसा॒ हि । हि धीरः॑ । धीरो॑ घृतं । घृतमेने । एने॒ अजनत् । एने॒ इत्येने॑ । अजननन्नमाने । नन्नमाने॒ इति॒ नन्नमाने ॥ यदेत् । इदंता॑ । अंता॒ अदर्दृꣳहंत । अदर्दृꣳहंत॒ पूर्वे॑ । पूर्व॒ आ । आदित् । इद्द्यावापृथिवी । द्यावापृथिवी अप्रथेताम् । द्यावापृथिवी इति॒ द्यावा॑- पृथिवी । अप्रथेतामित्यप्रथेताम् ॥ विश्वतश्चक्षुरुत । विश्वतश्चक्षुरिति॑ विश्वतः॑-चक्षुः । उत विश्वतोमुखः । विश्वतोमुखो विश्वतोहस्तः । विश्वतोमुख इति॑ विश्वतः॑-मुखः । विश्वतोहस्त उत । विश्वतोहस्त इति॑ विश्वतः॑-हस्तः । उत विश्वतस्पात् । विश्वतस्पादिति॑ विश्वतः॑-पात् ॥ सं बाहुभ्या॑म् । बाहुभ्यां नमति । बाहुभ्यामिति॑ बाहु-भ्यां । नमति॒ सं । सं पतत्रैः । पतत्रैर्द्यावापृथिवी । द्यावापृथिवी जनयन्न्॑ । द्यावापृथिवी इति॒ द्यावा॑- पृथिवी । जनयन्देवः । देव एकः॑ । एक इत्येकः॑ ॥ किꣳ स्वित् । स्विदासीत् । आसीदधिष्ठान॑म् । अधिष्ठान-मारंभणं ।

अधिष्ठानमित्यधि-स्थानँ । आरंभणं कतमत् । आरंभण मित्याँ-रंभणम् । कतमथ्स्वित् । स्वित्किम् । किमासीत् । आसीदित्यासीत् ॥ यदीभूमिँ । भूमिं जनयन्न् ()

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। जनयन्विश्वकर्मा । विश्वकर्मा वि । विश्वकर्मेतिं विश्व-कर्मा । विद्याम् । द्यामौर्णोत् । और्णोन्महिना । महिनाविश्वचक्षाः । विश्वचक्षा इतिं विश्व-चक्षाः ॥ किꣳस्वित् । स्विद्वनँ । वनं कः । क उं । उ सः । स वृक्षः । वृक्ष?आसीत् । आसीद्यतः । यतो द्यावापृथिवी । द्यावापृथिवी निष्टतक्षुः । द्यावापृथिवी इति द्यावाँ-पृथिवी । निष्टतक्षुरितिं निः-ततक्षुः । मनीषिणो मनसा । मनसा पृच्छतं । पृच्छतेत् । इदु । उ तत् । तद्यत् । यदध्यतिष्ठत् । अध्यतिष्ठद्भुवनानि । अध्यतिष्ठदित्यधि-अतिष्ठत् । भुवनानि धारयन्न् । धारयन्नितिं धारयन्न् ॥ या तैँ । ते धामानि । धामानि परमाणिं । परमाणि या । याऽव मा । ऽअवमा या । या मध्यमा । मध्यमा विश्वकर्मन् । विश्वकर्मन्नु त । विश्वकर्मन्नितिं विश्व-कर्मन्न् । उतेमा । इमेतीमा ॥ शिक्षा सखिभ्यः । सखिभ्यो हविषिं । सखिभ्य इति सखि-भ्यः । हविषिं स्वधावः । स्वधावः स्वयं । स्वधावः इतिं स्वधा-वः । स्वयं यजस्व । यजस्व तनुवँ । तनुवं जुषाणः । जुषाण इतिं जुषाणः ॥ वाचस्पतिँ । पतिं विश्वकर्माणं । विश्वकर्माण मूतयेँ ()

काण्ड -4, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -6,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। विश्वकर्माणमितिं विश्व-कर्माणं । ऊतये मनोयुजँ । मनोयुजं वाजँ । मनोयुजमितिं मनः-युजँ । वाजं अद्य । अद्या ꣳहुवेम । हुवेमेतिं हुवेम ॥ स नः । नो नेदिष्ठा । नेदिष्ठा हवनानि । हवनानि जोषते । जोषते विश्वशंभूः । विश्वशंभूरवसे । विश्वशंभूरितिं विश्व- शंभूः । अवसे साधुकर्मा । साधुकर्मेतिं साधु-कर्मा । विश्वकर्मन्, हविषा ।

विश्वकर्मन्निति विश्व-कर्मन्न् । हविषा वावृधानः । वावृधानः स्वयं । स्वयं यजस्व । यजस्व तनुवँ । तनुवं जुषाणः । जुषाण इति जुषाणः ॥ मुह्यन्त्वन्ये । अन्ये अभितः । अभितः सपत्नाँः । सपत्ना इह । इहास्माकँ । अस्माकं मघवाँ । मघवा सूरिः । मघवेति मघ-वा । सूरिरस्तु । अस्त्वित्यस्तु ॥ विश्वकर्मन्, हविषाँ । विश्वकर्मन्निति विश्व-कर्मन्न् । हविषा वर्धनेन । वर्धनेन त्रातारँ । त्रातारमिंद्रँ । इंद्रमकृणोः । अकृणोरवध्यम् । अवध्यमित्यवध्यम् ॥ तस्मै विशः । विशः सं । समनमंत । अनमंत पूर्वीः । पूर्वीरयं । अयमुग्रः । उग्रो विहव्यः । विहव्यो यथाँ । विहव्य इति वि-हव्यः । यथासत् । असदित्यसत् । समुद्राय वयुनाय । वयुनाय सिंधूनां । सिंधूनां पतये । पतये नमः । नम इति नमः ॥ नदीनाꣳ सर्वासां । सर्वासां पित्रे । पित्रे जुहुत । जुहुता विश्वकर्मणे । विश्वकर्मणे विश्वाँ । विश्वकर्मण इति विश्व-कर्मणे । विश्वाऽहाँ । अहाऽमर्त्यं । अमर्त्यꣳ हविः । हविरिति हविः () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

उदेनं । एनमुत्तरां । उत्तरां नय । उत्तरामित्युत्-तराम् । न यागँ । अग्नें घृतेन । घृतेनाऽऽहुत । आहुतेत्याहुत ॥ रायस्पोषेण । पोषेण सं । सꣳ सृज । सृज प्रजयाँ । प्रजया च । प्रजयेति प्र-जयाँ । च धनेन । धनेन च । चेति च ॥ इंद्रेमं । इमं प्रतरां । प्रतरां कृधि । प्रतरामिति प्र-तराम् । कृधि सजातानाँ । सजातानामसत् । सजातानामिति स-जातानाँ । असद्वशी । वशीति वशी ॥ स मेनं । एनं वर्चसा । वर्चसा सृज । सृज देवेभ्यः । देवेभ्यो भागधाः । भागधा असत् । भागधा इति भाग-धाः । असदित्यसत् ॥ यस्य कुर्मः । कुर्मो हविः । हविर्गृहे । गृहे तम् । तमग्ने । अग्ने वर्धय । वर्धया ब्रम् । ब्रमिति ब्रम् ॥ तस्मै देवाः । देवा अधि । अधि ब्रुवन् । ब्रुवन्नयं । अयं च । च ब्रह्मणः । ब्रह्मणस्पतिः । पतिरिति पतिः ॥ उदु । उब्रा । ब्रा विश्वे । विश्वे देवाः । देवा अग्नें ()

काण्ड -4, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। अग्ने भरंतु । भरंतु चित्तिंभिः । चित्तिंभिरिति चित्तिं-भिः ॥ स नः । नो भव । भव शिवतंमः । शिवतंमः सुप्रतींकः । शिवतंम इतिं शिव-तमः । सुप्रतींको विभांवसुः । सुप्रतींक इतिं सु-प्रतींकः । विभांवसुरितिं विभा-वसुः ॥ पंच दिशः । दिशो दैवीः । दैवींर्यज्ञं । यज्ञमंवंतु । अवंतु देवीः । देवीरपं । अपामंतिं । अमंतिं दुर्मतिं । दुर्मतिं बाधंमानाः । दुर्मतिमितिं दुः-मतिम् । बाधंमाना इति बाधं- मानाः ॥ रायस्पोषैं । पोषें यज्ञपंतिं । यज्ञपंतिमाभजंतीः । यज्ञपंतिमितिं यज्ञ-पतिं । आभजंतीरित्याँ-भजंतीः ॥ रायस्पोषैं । पोषे अधिं । अधिं यज्ञः । यज्ञो अंस्थात् । अस्थाथ्समिंद्धे । समिंद्धे अग्नौ । समिंद्ध इति सं-इद्धे । अग्नावधिं । अधिं मामहानः । मामहान इतिं मामहानः ॥ उक्थपंत्र ईड्यः । उक्थपंत्र इत्युक्थ-पत्रः । ईड्यो गृभीतः । गृभीतस्तप्तं । तप्तं घर्मम् । घर्मं पंरिगृह्य । पंरिगृह्या यजंत । पंरिगृह्येतिं परि-गृह्य । अयजंते- त्यंजंत ॥ ऊर्जा यत् । यद्यज्ञम् । यज्ञमशंमंत । अशंमंत देवाः । देवा दैव्यांय । दैव्यांय धर्त्रे । धर्त्रे जोष्ट्रैं । जोष्ट्र इति जोष्ट्रैं ॥ देवश्रीः श्रीमंणाः । देवश्रीरितिं देव-श्रीः । श्रीमंणाः शतपंयाः । श्रीमंणा इति श्री- मनाः । शतपंयाः पंरिगृह्य । शतपंया इतिं शतपंयाः ()

काण्ड -4, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। पंरिगृह्य देवाः । पंरिगृह्येतिं परि-गृह्य । देवा यज्ञं । यज्ञमांयन्न् । आयन्नित्यांयन्न् ॥ सूर्यंरश्मिर्हरिंकेशः । सूर्यंरश्मिरितिं सूर्यं-रश्मिः । हरिंकेशः पुरस्तांत् । हरिंकेश इतिं हरिं-केशः । पुरस्तांथ्सविता । सविता ज्योतिः । ज्योतिरुत् । उदं-यान् । अयाꣳ अजंस्रम् । अजंस्रमित्यजंस्रं ॥ तस्यं पूषा । पूषा प्रंसवं । प्रसवं यांति । प्रसवमितिं प्र-सवं । याति देवः । देवः संपश्यन्न् । संपश्यन् विश्वा । संपश्यन्नितिं सं-पश्यन्न् । विश्वा भुवंनानि । भुवंनानि गोपाः । गोपा इतिं गो-पाः । देवा देवेभ्यः । देवेभ्यो अध्वर्यंतः । अध्वर्यंतो अस्थुः । अस्थुर्वीतं । वीतꣳ शंमित्रे । शमित्रे शंमिता । शमिता यजध्यैं । यजध्या इतिं यजध्यैं ॥ तुरीयो यज्ञः । यज्ञो यत्रं । यत्रं हव्यं । हव्यमेतिं । एति ततः ।

ततः पावकाः । पावका आशिषः । आशिषो नः । आशिष इत्याँ-शिषः । नो जुषंतां । जुषंतामितिं जुषंताम् ॥ विमानं एषः । विमान इतिं वि-मानः । एष दिवः । दिवो मध्यैँ । मध्य आस्ते । आस्त आपप्रिवान् । आपप्रिवान्त्रोदंसी । आपप्रिवानित्याँ-पप्रिवान् । रोदंसी अंतरिक्षम् । रोदंसी इति रोदंसी । अंतरिक्षमित्यंतरीक्षं । स विश्वाचीः । विश्वाचीरभि ()

काण्ड -4, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। अभिचष्टे । चष्टे घृताचीः । घृताचीरंतरा । अंतरा पूर्वैँ । पूर्वमपरं । अपरं च । च केतुम् । केतुमितिं केतुम् ॥ उक्षा समुद्रः । समुद्रो अरुणः । अरुणः सुपर्णः । सुपर्णः पूर्वस्य । सुपर्ण इतिं सु-पर्णः । पूर्वस्य योनैँ । योनिं पितु । पितुरा । आ विवेश । विवेशेतिं विवेश ॥ मध्यैँ दिवः । दिवो निहितः । निहितः पृश्निः । निहित इति नि-हितः । पृश्निरश्माँ । अश्मा वि । वि चक्रमे । चक्रमे रजसः । रजसः पाति । पात्यंतौँ । अंतावित्यंतौँ ॥ इंद्रं विश्वाः । विश्वा अवीवृधन् । अवीवृधन्त्समुद्रव्यचसं । समुद्रव्यचसं गिरः । समुद्रव्यचसमितिं समुद्र-व्यचसम् । गिर इति गिरः ॥ रथीतमꣳ रथीनां । रथीतममितिं रथि-तमम् । रथीनां वाजानां । वाजानाꣳ सत्पतिं । सत्पतिं पतिँ । सत्पतिमिति सत्-पतिं । पतिमिति पतिँ ॥ सुम्नहूर्यज्ञः । सुम्नहूरितिं सुम्न-हूः । यज्ञो देवान् । देवाꣳ आ । आ च । च वक्षत् । वक्षद्यक्षत् । यक्षदग्निः । अग्नि- र्देवः । देवो देवान् । देवाꣳ आ । आ च । च वक्षत् । वक्षदितिं वक्षत् ॥ वाजस्यमा । मा प्रसवेनं । प्रसवेनौऽद्भाभेणं । प्रसवेनेतिं प्र-सवेनं । उद्भाभेणोत् । उद्भाभेणेत्युत्-ग्राभेणं । उदग्रभीत् । अग्रभीदित्यग्रभीत् ॥ अथा सपत्नान् । सपत्नाꣳ इंद्रः । इंद्रो मे । मे निग्राभेणं । निग्राभेणा-धरान् । निग्राभेणेतिं नि-ग्राभेणं । अधराꣳ अकः । अकरित्यकः ॥ उद्भाभं च । उद्भाभमित्युत्-ग्राभम् । च निग्राभं । निग्राभं च । निग्राभमितिं नि-ग्राभम् । च ब्रह्म । ब्रह्मदेवाः । देवा अवीवृधन् । अवीवृधन्नित्यविवृधन् ॥ अथा सपत्नान् । सपत्नानिंद्राग्नी । इंद्राग्नी मैँ । इंद्राग्नी इतीँद्र-अग्नी । मे विपूचीनान् । विपूचीनान्वि । व्यस्यताम् । अस्यतामित्यस्यताम् () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

आ॒शुः शि॒शा॒नः । शि॒शा॒नो वृ॒ष॒भः । वृ॒ष॒भो न । न यु॒ध्मः । यु॒ध्मो घ॒नाघ॒नः, । घ॒नाघ॒नः, क्षोभ॑णः । क्षोभ॑णश्चर्

ष॒णी॒नाम् । च॒र्ष॒णी॒नामिति॑ चर्षणी॒नाम् ॥ स॒ꣳक्रं॒द॒नोऽनि॑मिषः । स॒ꣳक्रं॒द॒न इति॑ सं-क्रं॒द॒नः । अनि॑मिष ए॒कवी॑रः ।

अनि॑मिष॒ इत्यनि-मि॒षः । ए॒कवी॑रः श॒तं । ए॒कवी॑र॒ इत्ये॑क-वी॒रः । श॒तꣳ सेना॑ः । सेना॑ अजयत् । अ॒ज॒य॒थ्साक॑ं ।

सा॒कमि॑न्द्र॒ः । इ॒न्द्र॒ इती॑न्द्र॒ः ॥ स॒ꣳक्रं॒द॒-नेनाऽनि॑मिषेण॑ । स॒ꣳक्रं॒द॒ने॒ नेति॑ सं-क्रं॒द॒नेन । अनि॑मिषेण॑ जि॒ष्णुना॑ ।

अनि॑मिषेणे॒त्यनि-मि॒षेण॑ । जि॒ष्णुना॑ यु॒त्का॒रेण॑ । यु॒त्का॒रेण॑ दुश्च॒वने॑न । यु॒त्का॒रेणेति॑ युत्-का॒रेण॑ । दु॒श्च॒वने॑न धृ॒ष्णुना॑ ।

दु॒श्च॒वने॒नेति॑ दुः-च्य॒वने॑न । धृ॒ष्णुणेति॑ धृ॒ष्णुना॑ ॥ तदिन्द्रे॑ण । इन्द्रे॑ण जयत । ज॒य॒त॒ तत् । तथ्स॑हध्वं । स॒ह॒ध्वं॒ युध॑ः । युधो॑

नरः । नर॒ इषु॑हस्तेन । इषु॑हस्ते॒न॒ वृष्णा॑ । इषु॑हस्ते॒नेतीषु॑-ह॒स्ते॒न॒ । वृ॒ष्णेति॒ वृष्णा॑ ॥ स इषु॑हस्तैः । इषु॑हस्तै॒ः सः ।

इषु॑हस्तै॒रितीषु॑-ह॒स्तै॒ः । स नि॑ष॒ंगिभि॑ः । नि॒ष॒ंगिभि॑र्वशी । नि॒ष॒ंगिभि॒रिति॑ निष॒ंगि-भि॒ः । व॒शी सꣳस्र॑ष्टा । सग्ग्स्र॑ष्टा॒ सः ।

सग्ग्स्र॑ष्टे॒ति॒ सं-स्र॒ष्टा॒ । स युध॑ः । युध॒ इन्द्र॑ः । इन्द्रो॑ गृ॒णेन॑ । गृ॒णेने॑ति गृ॒णेन॑ ॥ सꣳसृ॑ष्टजिथ्सो॑मपाः । सꣳसृ॑ष्टजि॒ति॑

सꣳसृष्ट-जित् । सो॒म॒पा बा॑हुश॒र्धी । सो॒म॒पा इति॑ सोम-पाः । बा॒हु॒श॒र्ध्यू॑र्ध्वध॑न्वा । बा॒हु॒श॒र्धी॒ति॑ बाहु-श॒र्धी । ऊ॒र्ध्वध॑न्वा

प्र॒ति॒हि॒ताभिः । ऊ॒र्ध्वध॒न्वेत्यू॒र्ध्व-ध॒न्वा॒ । प्र॒ति॒हि॒ताभि॒रस्ता॑ । प्र॒ति॒हि॒ताभि॒रिति॒ प्रति॑-हि॒ताभि॒ः । अस्ते॒त्यस्ता॑ ॥ बृह॑स्पते॒ परि॑

। परि॑ दीय ()

काण्ड -4, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। दी॒या॒ रथे॑न । रथे॑न रक्षो॒हा । र॒क्षो॒हाऽमित्रान्॑ । र॒क्षो॒हेति॑ रक्षः-हा । अमित्रा॑ꣳ अप॒बाध॑-मानः । अ॒प॒बाध॑मान॒

इत्य॑प-बाध॑मानः ॥ प्र॒भ॒ंजन्थ्सेना॑ः । प्र॒भ॒ंजन्नि॑ति॑ प्र-भ॒ंजन्न् । सेना॑ः प्रमृ॒णः । प्र॒मृ॒णो युधा । प्र॒मृ॒ण इति॑ प्र-मृ॒णः । युधा

जयन्न् । जयन्नस्माकँ । अस्माकमेधि । एध्यविता । अविता रथानां । रथानामिति रथानां ॥ गोत्रभिद गोविदँ । गोत्रबिदमिति गोत्र-भिदँ । गोविद वज्रबाहु । गोविदमिति गो-विदँ । वज्रबाहु जयन्त । वज्रबाहुमिति वज्र-बाहु । जयन्तमज्म । अज्म प्रमृणन्तँ । प्रमृणन्तमोजसा । प्रमृणन्तमिति प्रमृणन्तँ । ओजसेत्योजसा ॥ इमꣳ सजाताः । सजाता अनु । सजाता इति स-जाताः । अनुवीरयध्वं । वीरयध्वमिन्द्रँ । इन्द्रꣳ सखायः । सखायोऽनु । अनु सं । सꣳ रभध्वम् । रभध्वमिति रभध्वम ॥ बलविज्ञायः स्थविरः । बलविज्ञाय इति बल-विज्ञायः । स्थविरः प्रवीरः । प्रवीरः सहस्वान् । प्रवीर इति प्र-वीरः । सहस्वान्, वाजी । वाजी सहमानः । सहमान उग्रः । उग्र इत्युग्रः ॥ अभिवीरो अभिसत्वा । अभिवीर इत्यभि-वीरः । अभिसत्वा सहोजाः । अभिसत्वेत्यभि-सत्वा । सहोजा जैत्रँ । सहोजा इति सहः-जाः । जैत्रमिन्द्र । इन्द्र रथँ । रथ मा । आ तिष्ठ । तिष्ठ गोवित् । गोविदिति गो-वित् ॥ अभि गोत्राणि । गोत्राणि सहसा । सहसा गाहमानः । गाहमानोऽदायः । अदायो वीरः । ()

काण्ड -4, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

वीरः शतमन्युः । शतमन्युरिन्द्रः । शतमन्युरिति शत-मन्युः । इन्द्र इतीन्द्रः ॥ दुश्यवनः पृतनाषाट् । दुश्यवन इति दुः-च्यवनः । पृतना-षाडयुध्यः । अयुध्यौऽस्माकं । अस्माकꣳ सेनाः । सेना अवतु । अवतु प्र । प्र युत्सु । युत्स्विति युत्-सु ॥ इन्द्र आसां । आसान्नेता । नेता बृहस्पतिः । बृहस्पतिर्दक्षिणा । दक्षिणा यज्ञः । यज्ञः पुरः । पुर एतु । एतु सोमः । सोम इति सोमः ॥ देवसेनानामभिभञ्जतीनां । देवसेनानामिति देव-सेनानाँ । अभिभञ्जतीनां जयन्तीनां । अभिभञ्जतीनामित्यभि-भञ्जतीनां । जयन्तीनां मरुतः । मरुतो यन्तु । यन्वग्रैं । अग्र इत्यग्रैं ॥ इन्द्रस्य वृष्णः । वृष्णो वरुणस्य । वरुणस्य राज्ञः । राज्ञ आदित्यानाँ । आदित्यानाँ मरुताँ । मरुताꣳ शर्धः । शर्ध उग्रम् । उग्रमित्युग्रम् ॥ महामनसां भुवनच्यवानाँ । महामनसामिति महा-मनसाम् । भुवनच्यवानां घोषः । भुवनच्यवानामिति भुवन-च्यवानाँ । घोषो देवानाँ । देवानां जयतां । जयतामुत् । उदस्थात् । अस्थादित्यस्थात् ॥ अस्माकमिन्द्रः । इन्द्रः समृतेषु । समृतेषु

ध्वजेषु । समृतेष्मिति सं-ऋतेषु । ध्वजेष्वस्माकँ । अस्माकं याः । या इषवः । इषवस्ताः । ता जयंतु । जयन्विति जयंतु () ॥

काण्ड -4, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

अस्माकं वीराः । वीरा उत्तरे । उत्तरे भवंतु । उत्तर इत्युत्-तरे । भवन्नस्मान् । अस्मानु । उदेवाः । देवा अवत । अवता हवेषु । हवेष्विति हवेषु ॥ उद्धर्षय । हर्षय मघवन्न् । मघवन्नायुधानि । मघवन्निति मघ-वन्न् । आयुधान्युत् । उथ्सन्नना । सन्नना मामकानाँ । मामकानां महाꣳसि । महाꣳसीति महाꣳसि ॥ उद्वृत्रहन्, । वृत्रहन् वाजिनाँ । वृतृहन्निति वृतृ-हन्न् । वाजिनां वाजिनानि । वाजिनान्युत् । उद्रथानां । रथानां जयतां । जयतामेतु । एतु घोषः । घोष इति घोषः ॥ उप प्र । प्रेत । इत जयत । जयता नरः । नरः स्थिराः । स्थिरा वः । वः संतु । संतु बाहवः । बाहव इति बाहवः ॥ इंद्रो वः । वः शर्म । शर्म यच्छतु । यच्छन्नधृष्याः । अनाधृष्या यथाँ । अनाधृष्या इत्यना-धृष्याः । यथासथ । असथे इत्यसथ ॥ अवसृष्टा पराँ । अवसृष्टेत्यव-सृष्टा । परा पत । पत शरव्ये । शरव्ये ब्रह्मसꣳशिता । ब्रह्मसꣳशितेति ब्रह्म-सꣳशिता ॥ गच्छामित्रान् । अमित्रान्म ()

काण्ड -4, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। प्र विश । विश मा । मैषाँ । एषां कं । कं चन । च नोत् । उच्छिषः । शिष इति शिषः ॥ मर्माणि ते । ते वर्मभिः । वर्मभिश्छादयामि । वर्मभिरिति वर्म-भिः । छादयामि सोमः । सोमस्त्वा । त्वा राजाँ । राजाऽमृतेन । अमृतेनाभि । अभिवस्ताम् । वस्तामिति वस्ताम् ॥ उरोर्वरीयः । वरीयो वरिवः । वरिवस्ते । ते अस्तु । अस्तु जयंतं । जयंतं त्वां । त्वा मनु । अनु मदंतु । मदंतु देवा । देवा इति देवाः । यत्र बाणाः । बाणाः संपतंति । संपतंति

कुमाराः । संपतीति सं-पतति । कुमारा विशिखाः । विशिखा इव । विशिखा इति वि-शिखाः । इवेतीव ॥ इंद्रो नः । नस्तत्र । तत्र वृत्रहा । वृत्रहा विश्वाहा । वृत्रहेति वृत्र-हा । विश्वाहा शर्म । विश्वाहेति विश्व-हा । शर्म यच्छतु । यच्छत्विति यच्छतु () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

प्राचीमनु । अनु प्रदिशँ । प्रदिशं प्र । प्रदिशमिति प्र-दिशँ । प्रेहि । इहि विद्वान् । विद्वानग्नेः । अग्नेरग्ने । अग्ने पुरो अंग्निः । पुरो अंग्निर्भव । पुरो अंग्निरिति पुरः-अग्निः । भवेह । इहेतीह ॥ विश्वा आशाँः । आशा दीद्यानः । दीद्यानो वि । वि भाहि । भाह्यूर्जँ । ऊर्जं नः । नो धेहि । धेहि द्विपदे । द्विपदे चतुंष्पदे । द्विपद इति द्वि-पदे । चतुंष्पद इति चतुंः-पदे ॥ क्रमंध्वमग्निनाँ । अग्निना नाकँ । नाकमुख्यँ । उख्यꣳ हस्तेंषु । हस्तेंषु बिभ्रतः । बिभ्रत इति बिभ्रतः ॥ दिवः पृष्ठं । पृष्ठꣳ सुवः । सुवर्गब्बा । गब्बा मिश्राः । मिश्रा देवेभिः । देवेभिराध्वम् । आध्वमित्याँध्वम् ॥ पृथिव्या अहं । अहमुत् । उदंतरिक्षम् । अंतरिक्षमा । आरुहं । अरुहमन्तरिक्षात् । अन्तरिक्षाद्दिवँ । दिवमा । आरुहं । अरुहमित्यरुहम् ॥ दिवो नाकस्य । नाकस्य पृष्ठात् । पृष्ठाथ्सुवः । सुवर्ज्योतिः । ज्योतिरगाम् ()

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। अगामहम् । अहमित्यहम् ॥ सुवर्यंतः । यंतो न । नापं । अपँक्षंते । ईक्षंत आ । आद्यां । द्याꣳ रोंहंति । रोहंति रोदंसी । रोदंसी इति रोदंसी ॥ यज्ञं ये । ये विश्वतोंधारं । विश्वतोंधारꣳ सुविद्वाꣳसः । विश्वतोंधारमिति विश्वतः-धारम् । सुविद्वाꣳसो वितेनिरे । सुविद्वाꣳस इति सु-विद्वाꣳसः । वितेनिर इति वि-तेनिरे ॥ अग्ने प्र । प्रेहि । इहि प्रथमः । प्रथमो देवयतां । देवयतां चक्षुः । देवयतामिति देव-यताम् । चक्षुर्देवानाँ । देवानामुत । उत मर्त्यानाम् ।

मर्त्यानामिति मर्त्यानां ॥ इयक्षमाणा भृगुभिः । भृगुभिः सजोषाँः । भृगुभिरिति भृगु-भिः । सजोषाः सुवः । सजोषा इतिं स-जोषाँः । सुवर्यंतु । यंतु यजमानाः । यजमानाः स्वस्ति । स्वस्तीतिं स्वस्ति ॥ नक्तोषासा समनसा । समनसा विरूपे । समनसेति स-मनसा । विरूपे धापयेते । विरूपे इति वि-रूपे । धापयेते शिशुँ । धापयेते इतिं धापयेते ॥ शिशुमेकँ । एकꣳ समीची । समीची इतिं समीची ॥ द्यावा क्षामं । क्षामा रुक्मः । रुक्मो अंतः । अंतर्विविभाति । भाति देवाः । देवा अग्निम् । अग्नि धारयन् । धारयन्द्रविणोदाः । द्रविणोदा इतिं द्रविणः- दाः ॥ अग्नें सहस्राक्ष । सहस्राक्ष शतमूर्धन् । सहस्राक्षेतिं सहस्र- अक्ष ()

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। शतमूर्धन्छतं । शतमूर्धनिंति शत-मूर्धन् । शतं तें । ते प्राणाः । प्राणाः सहस्रँ । प्राणा इतिं प्र-अनाः । सहस्रंमपानाः । अपाना इत्यप-अनाः ॥ ब्रꣳ सांहस्रस्यं । साहस्रस्यं रायः । राय ईंशिषे । ईंशिषे तस्मैं । तस्मैं ते । ते विधेम । विधेम वाजांय । वाजांय स्वाहाँ । स्वाहेति स्वाहाँ ॥ सुपर्णोंऽसि । सुपर्ण इतिं सु-पर्णः । असि गरुत्मान् । गरुत्माँन्पृथिव्यां । पृथिव्याꣳ सींद । सींद पृष्ठे । पृष्ठे पृंथिव्याः । पृथिव्याः सींद । सींद भासा । भासाऽंन्तरिंक्षं । अंतरिंक्षमा । आ पृंण । पृण ज्योतिंषा । ज्योतिंषा दिवँ । दिव मुत् । उत्तंभान । स्तभान तेजसा । तेजसा दिशः । दिश उत् । उदृꣳह । दृꣳहेतिं दृꣳह ॥ आजुह्वांनः सुप्रतींकः । आजुह्वान इत्याँ-जुह्वांनः । सुप्रतींकः पुरस्तांत् । सुप्रतींक इतिं सु-प्रतींकः । पुरस्तादग्नें । अग्ने स्वां । स्वां योनिँ । योनि मा । आसींद । सींदसाध्या । साध्येतिं साध्या ॥ अस्मिन्थ्सदस्थँ । सधस्थे अधिं । सधस्थ इतिं सध-स्थे । अध्युत्तरस्मिन्, । उत्तरस्मिन्, विश्वँ । उत्तरस्मिन्नित्युत्- तरस्मिन्न् । विश्वे देवाः ()

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। देवा यजमानः । यजमानश्च । च सीदत । सीदतेति सीदत ॥ प्रेद्धो अग्ने । प्रेद्ध इति प्र-इद्धः । अग्ने दीदिहि । दीदिहि पुरः । पुरो नः । नोजस्रया । अजस्रया सूर्म्या । सूर्म्या यविष्ठ । यविष्ठेति यविष्ठ ॥ ब्राꣳ शश्वतः । शश्वत उप । उप यंति । यंति वाजाः । वाजा इति वाजाः ॥ विधेम ते । ते परमे । परमे जन्मन्न् । जन्मन्नग्ने । अग्ने विधेम । विधेम स्तोमैः । स्तोमैरवरे । अवरे सधस्थे । सधस्थ इति सध- स्थे ॥ यस्माद्योनेः । योनेरुदारिथ । उदारिथा यजे । उदारिथेत्युत्- आरिथ । यजे तं । तं प्र । प्र ब्रे । ब्रे हवीꣳषि । ब्रे इति ब्रे । हवीꣳषि जुहुरे । जुहुरे समिद्धे । समिद्ध इति सं-इद्धे ॥ ताꣳ सवितुः । सवितु- वरेण्यस्य । वरेण्यस्य चित्रां । चित्रा मा । आहं । अहं वृणे । वृणे सुमतिं । सुमतिं विश्वजन्याम् । सुमतिमिति सु-मतिम् । विश्वजन्यामिति विश्व-जन्याम् ॥ यामस्य । अस्य कण्वः । कण्वो अदुहत् । अदुहत्प्रपीनां । प्रपीनाꣳ सहस्रधारां । प्रपीनामिति प्र-पीनाम् । सहस्रधारां पयसा । सहस्रधारामिति सहस्र-धाराम् ()

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

। पयसा महीं । महीं गाम् । गामिति गाम् ॥ सप्त तै । ते अग्ने । अग्ने समिधः । समिधः सप्त । समिध इति सं-इधः । सप्त जिह्वाः । जिह्वाः सप्त । सप्त ऋषयः । ऋषयः सप्त । सप्त धामं । धामं प्रियाणि । प्रियाणीति प्रियाणि ॥ सप्त होत्राः । होत्राः सप्तधा । सप्तधा ब्रा । सप्तधेति सप्त-धा । ब्रा यजति । यजति सप्त । सप्त योनीः । योनीरा । आ पृणस्व । पृणस्वा घृतेन । घृतेनेति घृतेन ॥ ईदृङ् च । चान्यादृङ् । अन्यादृङ् च । चैतादृङ् । एतादृङ् च । च पतिदृङ् । प्रतिदृङ् च । प्रतिदृङ्निति प्रति-दृङ् । च मितः । मितश्च । च संमितः । संमितश्च । संमित इति सं-मितः । च सभरा । सभरा इति स-भराः ॥ शुक्रज्योतिश्च । शुक्रज्योतिरिति शुक्र-ज्योतिः । च चित्रज्योतिः । चित्रज्योतिश्च ।

चित्रज्योतिरिति चित्र-ज्योतिः । च सत्यज्योतिः । सत्य ज्योतिश्च । सत्यज्योतिरिति सत्य-ज्योतिः च सत्यः । सत्यश्च ।
चर्तपाः । ऋतपाश्च । ऋतपा इत्यृत-पाः । चात्यꣳहाः । अत्यꣳहा इत्यति-अꣳहाः () ॥

काण्ड -4, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -6,

आग्नेय-काण्डम् -विषयः -अग्निचयनम्,

ऋत-जिच्च । ऋतजिदित्यृत-जित् । च सत्यजित् । सत्यजिच्च । सत्यजिदिति सत्य-जित् । च सेनजित् । सेन जिच्च
। सेनजिदिति सेन-जित् । च सुषेणः । सुषेणश्च । सुषेण इति सु-सेनः । चात्यमित्रः । अत्यमित्रश्च । अत्यमित्र
इत्यति-अमित्रः । च दूरे अमित्रः । दूरे अमित्रश्च । दूरे?अमित्र इति दूरे अमित्रः । च गणः । गण इति गणः ॥
ऋतश्च । च सत्यः । सत्यश्च । च ध्रुवः । ध्रुवश्च । च धरुणः । धरुणश्च । च धर्ता । धर्ता च । च विधर्ता । विधर्ता
च । विधर्तेति वि-धर्ता । च विधारयः । विधारय इति वि-धारयः ॥ ईदृक्षास एतादृक्षासः । एतादृक्षास उ । *ऊषुणः ।
सु नः । नः सदृक्षासः । सदृक्षासः प्रतिसदृक्षासः । प्रतिसदृक्षास आ । प्रतिसदृक्षास इति प्रति-सदृक्षासः । एतन ।
इतनेतीतन ॥ मितासश्च । च सम्मितासः । संमितासश्च । संमितास इति सं-मितासः । च नः । न ऊतयै । ऊतये
सभरसः । सभरसो मरुतः । सभरस इति स-भरसः । मरुतो यज्ञे । यज्ञे अस्मिन् । अस्मिन्निंद्र । इंद्र दैवीः ।
दैवीर्विशः । विशो मरुतः । मरुतोऽनुवर्मानः । अनुवर्मानो यथा । अनुवर्मान इत्यनु-वर्मानः । यथेंद्र । इंद्र दैवीः ।
दैवीर्विशः । विशो मरुतः । मरुतोऽनु- वर्मानः । अनुवर्मान एवं । अनुवर्मान इत्यनु-वर्मानः । एवमिमं । इमं
यजमानं । यजमानं दैवीः । दैवीश्च । च विशः । विशो मानुषीः । मानुषीश्च । चानुवर्मानः । अनुवर्मानो भवंतु ।
अनुवर्मान इत्यनु-वर्मानः । भवंत्विति भवंतु () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

जीमूतस्येव । इव भवति । भवति प्रतीकं । प्रतीकं यत् । यद्वर्मी । वर्मी याति । याति समदाँ । समदामुपस्थैँ । समदामिति स-मदाम् । उपस्थ इत्युप-स्थे ॥ अनाविद्धया तनुवाँ । अनाविद्धयेत्यनाँ-विद्धया । तनुवा जय । जय ब्रं । ब्रꣳ सः । स ब्राँ । ब्रा वर्मणः । वर्मणो महिमा । महिमा पिपर्तु । पिपर्त्विति पिपर्तु ॥ धन्वना गाः । गा धन्वना । धन्वनाऽऽजिं । आजिं जयेम । जयेम धन्वना । धन्वना तीव्राः । तीव्राः समदः । समदो जयेम । समद इति स-मदः । जयेमेति जयेम ॥ धनुः शत्रोँ । शत्रोरपकामं । अपकामं कृणोति । अपकाममित्यप-कामं । कृणोति धन्वना । धन्वना सर्वाँ । सर्वाः प्रदिशः । प्रदिशो जयेम । प्रदिश इति प्र- दिशः । जयेमेति जयेम ॥ वक्ष्यंतीव । इवेत् । इदा । आ गनीगंति । गनीगंति कर्णँ । कर्णं प्रियं । प्रियꣳ सखायं । सखायं परिषस्वजाना । परिषस्वजा-नेति परि-सस्वजाना ॥ योषेव । इव शिंक्ते । शिंक्ते वितता । विततााऽधिं । विततेति वि-तता । अधि धन्वन् ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। धन्वञ्या । ज्या इयं । इयꣳ समने । समने पारयंती । पारयंतीति पारयंती ॥ ते आचरंती । ते इति ते । आचरंती समना । आचरंती इत्याँ-चरंती । समनेव । इव योषाँ । योषा माता । मातेवं । इव पुत्रं । पुत्रं बिभृतां । बिभृतामुपस्थैँ । उपस्थ इत्युप-स्थे ॥ अप शत्रून्, । शत्रून्, विध्यतां । विध्यताꣳ संविदाने । संविदाने आर्ब्बीँ । संविदाने इति सं-विदाने । आर्ब्बि इमे । आर्ब्बी इत्यार्ब्बीँ । इमे विष्फुरंतिँ । इमे इतीमे । विष्फुरंती अमित्रान् । विष्फुरंती इति वि-स्फुरंतीँ । अमित्रानित्यमितान् ॥ बह्वीनां पिता । पिता बहुः । बहुरस्य । अस्य पुत्रः । पुत्रश्चिश्चा । चिश्चा कृणोति । कृणोति समना । समनाऽवगत्यं । अवगत्येत्यव-गत्यं ॥ इषुधिः सङ्काँ । इषुधिरितीषु-धिः । सङ्काः पृतनाः । पृतनाश्च । च सर्वाँ । सर्वाँ पृष्ठे । पृष्ठे निनद्धः । निनद्धो जयति । निनद्ध इति नि-नद्धः । जयति प्रसूतः । प्रसूत इति प्र-सूतः ॥ रथे तिषन्न् । तिष्ठन्नयति । नयति वाजिनः । वाजिनः पुरः । पुरो यत्रयत्र । यत्रयत्र कामयते । यत्रयत्रेति यत्र- यत्र । कामयते सुपारथिः । सुपारथिरितिं सु-सारथिः ॥ अभीशूनां महि- मानँ ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। महिमानं पनायत । पनायत मनः । मनः पश्चात् । पश्चादनु । अनु यच्छंति । यच्छंति रश्मयः । रश्मय इति रश्मयः ॥ तीव्रान्घोषान् । घोषाँन्कृण्वते । कृण्वते वृषपाणयः । वृषपाणयोऽश्वाः । वृषपाणय इति वृष-पाणयः । अश्वा रथेभिः । रथेभिः सह । सह वाजयंतः । वाजयंत इति वाजयंतः ॥ अवक्रामंतः प्रपदैः । अवक्रामंत इत्यव- क्रामंतः । प्रपदैरमित्रान् । प्रपदैरिति प्र-पदैः । अमित्राँन्क्षिणंति । क्षिणंति शत्रून् । शत्रूꣳरनपव्ययंतः । अनपव्ययंत इत्यनप-व्ययंतः ॥ रथवाहनꣳ हविः । रथवाहनमिति रथ-वाहनं । हविरस्य । अस्य नाम । नाम यत्र । यत्राऽऽयुधं । आयुधं निहितं । निहितमस्य । निहितमिति नि-हितम् । अस्य वर्म । वर्मेति वर्म ॥ तत्रारथँ । रथमुप । उप शग्मं । शग्मꣳ सदेम । सदेम विश्वाहाँ । विश्वाहावयम् । विश्वाहेति विश्वा-अहाँ । वयꣳ सुमनस्य मानाः । सुमनस्यमाना इति सु-मनस्यमानाः ॥ स्वादुषꣳसदः पितरः । स्वादुषꣳसद इति स्वादु-सꣳसदः । पितरो वयोधाः । वयोधाः कृच्छ्रेश्रितः । वयोधा इति वयः-धाः । कृच्छ्रेश्रितः शक्तीवंतः । कृच्छ्रेश्रित इति कृच्छ्रे-श्रितः । शक्तीवंतो गभीराः । शक्तीवंत इति शक्ति-वंतः । गभीरा इति गभीराः ॥ चित्रसेना इषुबलाः । चित्रसेना इति चित्र-सेनाः । इषुबला अमृध्राः । इषुबला इतीषु-बलाः । अमृध्राः सतोवीराः । सतोवीरा उरवः । सतोवीरा इति सतः-वीराः । उरवो व्रातसाहाः । व्रातसाहा इति व्रात- साहाः ॥ ब्राह्मणासः पितरः ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। पितरः सोम्यासः । सोम्यासः शिवे । शिवे नः । शिवे इति शिवे । नो द्यावापृथिवी । द्यावापृथिवी अनेहसाँ । द्यावापृथिवी इति द्यावाँ-पृथिवी । अनेहसेत्यनेहसाँ ॥ पूषा नः । नः पातु । पातु दुरितात् । दुरितादृतावृधः ।

दुरितादितिं दुः-इतात् । ऋतावृधो रक्षं । ऋतावृध इत्यृत-वृधः । रक्षा माकिः । माकिर्नः । नो अघशंस सः । अघशंस ईशत । अघशंस इत्यघ-शंसः । ईशतेतीशत ॥ सुपर्णं वस्ते । सुपर्णमितिं सु-पर्णं । वस्ते मृगः । मृगो अस्याः । अस्या दंतः । दंतो गोभिः । गोभिः सन्नद्धा । सन्नद्धा पतति । सन्नद्धेति सं-नद्धा । पतति प्रसूता । प्रसूतेति प्र- सूता ॥ यत्रा नरः । नरः सं । सं चं । च वि । वि चं । च द्रवंति । द्रवंति तत्रं । तत्रास्मभ्यँ । अस्मभ्यमिषवः । अस्मभ्यमित्यस्म-भ्यं । इषवः शर्म । शर्म यꣳसन् । यꣳसन्नितिं यꣳसन् ॥ ऋजींते परिं । परिं वृंग्धि । वृंग्धि नः । नोऽश्माँ । अश्मा भवतु । भवतु नः । नस्तनूः । तनूरितिं तनूः ॥ सोमो अधिं । अधिं ब्रवीतुः । ब्रवीतुः नः । नोऽदितिः ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। अदितिः शर्म । शर्म यच्छतु । यच्छत्रितिं यच्छतु ॥ आजंघंति । जंघंति सानुं । सान्वेषां । एषां जघनान् । जघनाꣳ उपं । उपं जिघ्नते । जिघ्नत इतिं जिघ्नते ॥ अश्वांजनि पंचेतसः । अश्वांजनीत्यश्व-अजनि । प्रचेतसोऽश्वान् । प्रचेतस इति प्र-चेतसः । अश्वाँन्थ्समथ्सु । समथ्सु चोदय । समथ्सित्तिं समत्-सु । चोदयेतिं चोदय ॥ अहिंरिव । इव भोगैः । भोगैः परिं । पर्यंति । एति बाहुम् । बाहुं ज्यायाँः । ज्यायां हेतिं । हेतिं परिबाधमानः । परिबाधमान इतिं परि-बाधमानः ॥ हस्तघ्नो विश्वाँ । हस्तघ्न इतिं हस्त-घ्नः । विश्वा वयुनांनि । वयुनांनि विद्वान् । विद्वान्पुमान् । पुमान्पुमांꣳ सं । पुमांꣳसं परिं । परिं पातु । पातु विश्वतः । विश्वत इतिं विश्वतः ॥ वनस्पते वीड्वंगः । वीड्वंगो हि । वीड्वंग इतिं वीडु-अंगः । हि भूयाः । भूया अस्मथ्संखा । अस्मथ्संखा प्रतरणः । अस्मथ्सखेत्यस्मत्-सखा ॥ प्रतरणः सुवीरः । प्रतरण इतिं प्र-तरणः । सुवीर इतिं सु-वीरः ॥ गोभिः सन्नद्धः । सन्नद्धो असि । सन्नद्ध इति सं-नद्धः । असि वीडयस्व । वीडयस्वाऽऽस्थाता । आस्थाऽतातैं । आस्थातेत्याँ-स्थाता । ते जंषृतु । जयतु जेत्रांनि । जेत्रानीति जेत्रांनि ॥ दिवः पृथिव्याः । पृथिव्याः परिः ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। पर्योज॑ः । ओज॒ उ॒द्भृत॑म् । उ॒द्भृत॑ व॒न॒स्पति॑भ्यः । उ॒द्भृ॒तमित्यु॒त्-भृ॒तम् । व॒न॒स्पति॑भ्यः॒ परि॑ । व॒न॒स्पति॑भ्य॒ इति॑ वन॒स्पति॑-भ्यः । पर्याभृ॑तम् । आभृ॑तꣳ सहः॑ । आभृ॑तमित्या-भृ॒तम् । सह॒ इति॒ सहः॑ ॥ अ॒पामो॒ज्मान॑म् । ओ॒ज्मान॒म् परि॑ । परि॒ गोभिः॑ । गोभि॒रावृ॑तम् । आवृ॑तमिंद्र॒स्य । आवृ॑तमित्या-वृ॒तम् । इ॒न्द्र॒स्य॒ वज्र॑म् । वज्रꣳ॑ ह॒विषा॑ । ह॒विषा॒ रथ॑म् । रथ॑म् यज । यजे॒ति॑ यज ॥ इ॒न्द्र॒स्य॒ वज्रः॑ । वज्रो॑ मरुता॑म् । म॒रु॒ता॒ मनी॑कम् । अनी॑कं मि॒त्रस्य॑ । मि॒त्रस्य॒ गर्भः॑ । गर्भो॑ वरु॑णस्य । वरु॑णस्य॒ नाभिः॑ । नाभि॒रिति॒ नाभिः॑ ॥ सेमां । इ॒मान्नः॑ । नो॒ ह॒व्य॒दा॑तिं । ह॒व्य॒दा॑तिं जुषा॒णः । ह॒व्य॒दा॑ति॒मिति॑ हव्य-दा॒ति॒म् । जु॒षा॒णो देव॑ । देव॑ रथ । रथ॒ प्रति॑ । प्रति॑ ह॒व्या । ह॒व्या गृ॑भाय । गृ॒भा॒येति॑ गृभाय ॥ उप॑ श्वासय । श्वा॒स॒य॒ पृ॒थि॒वीं । पृ॒थि॒वीमु॒त । उ॒त द्यां । द्यां पु॑रुत्रा । पु॒रु॒त्रा ते॑ । पु॒रु॒त्रेति॑ पुरु-त्रा । ते॒ म॒नु॒ता॑ । म॒नु॒ता॑ विष्टि॑तं । विष्टि॑तं॒ जग॑त् । विष्टि॑त॒मिति॒ वि-स्थि॒त॒म् । जग॒दिति॒ जग॑त् ॥ स दु॑दुभे । दु॒दु॒भे॒ स॒जूः । स॒जूरि॑न्द्रे॒ण । स॒जूरिति॑ स-जूः । इ॒न्द्रे॒ण दे॒वैः । दे॒वैर्दू॒रात् ()

काण्ड -4, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। दू॒राद॒वीयः । दवी॑यो॒ अप॑ । अप॑ सेध । से॒ध॒ श॒त्रून् । श॒त्रूनिति॑ श॒त्रून् ॥ आक्र॑दय । क्र॒न्द॒य॒ बल॑म् । बल॒मोजः॑ । ओजो॒ नः । न आ । आधा॑ः । धा॒निः । निष्टॅनिहि । स्त॒निहि॒ दुरि॑ता । दुरि॑ता बाध॑मानः । दुरि॑तेति॑ दुः-इ॒ता । बाध॑मान॒ इति॒ बाध॑मानः ॥ अप॑ प्रोथ । प्रो॒थ॒ दु॒दु॒भे॒ । दु॒दु॒भे॒ दुच्छु॑नान् । दु॒च्छु॒ना॑ꣳ इ॒तः । इ॒त इ॑न्द्र॒स्य । इ॒न्द्र॒स्य मु॒ष्टिः । मु॒ष्टिर॑सि । अ॒सि॒ वी॒ड॒य॒स्व । वी॒ड॒य॒स्वेति॑ वीडयस्व ॥ आऽमूः । अ॒मू-र॑ज । अ॒ज॒ प्रत्याव॑र्तय । प्रत्याव॑र्तयेमाः । प्रत्याव॑र्तयेति॑ प्रति-आव॑र्तय । इ॒माः के॒तु॒मत् । के॒तु॒मद्दु॑दुभिः । के॒तु॒मदिति॑ केतु-मत् । दु॒दु॒भि र्वा॑वदीति । वा॒व॒दी॒तीति॑

वावदीति ॥ समश्वपर्णाः । अश्वपर्णाश्चरंति । अश्वपर्णा इत्यश्व-पर्णाः । चरंति नः । नो नरः । नरोऽस्माकँ ।
अस्माकमिंद्र । इंद्र रथिनः । रथिनो जयंतु । जयंतीति जयंतु () ॥॥

काण्ड -4, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

यदक्रंदः । अक्रंदः प्रथमम् । प्रथमं जायमानः । जायमान उदन्न् । उदन्थ्समुद्रात् । उदन्नित्युत्-यन्न् । समुद्रादुत ।
उत वाँ । वा पुरीषात् । पुरीषादिति पुरीषात् ॥ श्येनस्य पक्षा । पक्षा हरिणस्य । हरिणस्य बाहू । बाहू उपस्तुत्यँ ।
बाहू इति बाहू । उपस्तुत्यं महि । उपस्तुत्यमित्युप-स्तुत्यँ । महि जातं । जातं तेँ । ते अर्वन्न् । अर्व- न्नित्यर्वन्न् ॥
यमेनं दत्तं । दत्तं त्रितः । त्रित एनं । एनमायुनक् । आयुनगिंद्रः । इंद्र एणं । एनं प्रथमः । प्रथमो अधि ।
अध्यतिष्ठत् । अतिष्ठदित्यतिष्ठत् ॥ गंधर्वो अस्य । अस्य रशनाम् । रशनामगृभ्णात् । अगृभ्णाथ्सूराँत् । सूरादश्वँ ।
अश्व वसवः । वसवो निः । निरतष्ट । अतष्ट-त्यतष्ट ॥ असि यमः । यमो असि । अस्यादित्यः । आदित्यो अर्वन् ।
अर्वन्नसि । असि त्रितः । त्रितो गुह्येन । गुह्येन व्रतेन । व्रतेनेति व्रतेन ॥ असि सोमेन । सोमेन समयाँ । समया
विपृक्तः ()

काण्ड -4, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। विपृक्त आहुः । विपृक्त इति वि-पृक्तः । आहुस्तेँ । ते त्रीणि । त्रीणि दिवि । दिवि बंधनानि । बंधनानीति बंधनानि
॥ त्रिणि ते । त आहुः । आहुर्दिवि । दिवि बंधनानि ॥ बंधनानि त्रीणि । त्रीण्यप्सु । अप्सुत्रीणि । अफ्स्वित्यप्-सु ।
त्रीण्यंतः । अंतः समुद्रे । समुद्र इति समुद्रे ॥ उतेव । इव मे । मे वरुणः । वरुणश्चन्थ्सि । छन्थ्स्यर्वन्न्, । अर्वन्,
यत्र । यत्रा ते । त आहुः । आहुः परमं । परमं जनित्रँ । जनित्रमिति जनित्रँ ॥ इमातेँ । ते वाजिन्न् । वाजिन्नव

मार्ज॑नानि । अ॒व मार्ज॑नानीमा । अ॒वमार्ज॑ना नीत्य॑व-मार्ज॑नानि । इ॒मा श॒फाना॑ँ । श॒फानाꣳ॑ सनि॒तुः । स॒नि॒तु नि॒धाना॑ँ । नि॒धानेति॑ नि-धाना॑ँ ॥ अत्रा॑ ते । ते भ॒द्राः । भ॒द्रा र॑श॒नाः । र॒श॒ना अ॑पश्यम् । अ॒प॒श्य॒मृ॒तस्य॑ । ऋ॒तस्य॒ याः । या अ॑भि॒रक्ष॑न्ति । अ॒भि॒रक्ष॑न्ति गो॒पाः । अ॒भि॒रक्ष॑न्तीत्य॑भि-रक्ष॑न्ति । गो॒पा इति॑ गो-पाः ॥ आ॒त्मान॑ ते । ते मन॑सा । मन॑साऽऽरात् । आरा॑द॒जाना॑म् । अ॒जा॒ना॒मवः॑ । अ॒वो दि॒वा ()

काण्ड -4, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। दि॒वा प॒तय॑न्तं । प॒तय॑न्तं पत॒गम् । प॒त॒गमिति॑ पत॒गं ॥ शिरो॑ अपश्यं । अ॒प॒श्य॒ꣳ॒ प॒थिभिः॑ । प॒थिभि॑ः सु॒गेभि॑ः । प॒थिभि॒रिति॑ प॒थि-भि॒ः । सु॒गेभि॑ररे॒णुभि॑ः । सु॒गेभि॒रिति॑ सु-गेभि॑ः । अरे॑णुभि॒र्जेह॑मानं । अरे॑णुभि॒रित्यरे॑णु-भि॒ः । जेह॑मानं पतत्रि । प॒त॒त्रीति॑ पतत्रि ॥ अत्रा॑ ते । ते रू॒पम् । रू॒पमु॑त्त॒मम् । उ॒त्त॒मम॑पश्यं । उ॒त्त॒ममित्यु॑त्-त॒मम् । अ॒प॒श्य॒ꣳ॒ जिगी॑षमाणं । जिगी॑षमाणमि॒षः । इ॒ष आ । आ प॒दे । प॒दे गोः । गोरिति॒ गोः ॥ य॒दा ते॑ । ते॒ मर्तः॑ । मर्तो॒ अनु॑ । अनु॒ भोग॑ँ । भोग॒मान॑ट् । आन॑डात् । आदित् । इ॒द्ध्मसि॑ष्टः । ग्रसि॑ष्ठ ओष॑धीः । ओष॑धिरजीगः । अ॒जी॒ग इ॒त्य॑जीगः ॥ अनु॑ ब्बा । ब्बा रथः॑ । रथो॒ अनु॑ । अनु॒ मर्यः॑ । मर्यो॒ अर्व॑न्न् । अ॒र्व॒न्ननु॑ । अनु॒ गाव॑ः । गावोऽनु॑ । अनु॒ भगः॑ । भग॑ः कनीनाम्॑ । क॒नी॒नामिति॑ कनीनाम्॑ ॥ अनु॒ व्रातासः॑ । व्रातास॒स्तव॑ । तव॑ स॒ख्यं । स॒ख्यमी॑युः । ई॒युर॒नु॑ । अनु॑ देवाः । देवा मम॑मिरे । म॒मि॒रे वी॒र्यं॑ ()

काण्ड -4, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। वी॒र्यं॑ ते । त इति॒ ते ॥ हिर॑ण्यशृ॒ङ्गोऽय॑ः । हिर॑ण्यशृङ्ग इति॒ हिर॑ण्य-शृ॒ङ्गः॒ । अयो॑ अस्य । अ॒स्य॒ पादा॑ः । पादा॒ मनो॑जवाः । मनो॑जवा॒ अव॑रः । मनो॑जवा॒ इति॒ मन॑ः-जवाः॒ । अव॑र॒ इन्द्रः॑ । इन्द्र॑ आसीत् । आ॒सी॒दित्या॑-सीत् ॥ देवा

इत् । इदस्य । अस्य हविरद्य । हविरद्यमायन्न् । हविरद्यमिति हविः-अद्य । आयन्, यः । यो अर्वतं । अर्वतं प्रथमः । प्रथमो अध्यतिष्ठत् । अध्यतिष्ठदित्यधि-अतिष्ठत् ॥ ईर्मातासः सिलिकमध्यमास । ईर्मातास इतीर्मा-अतासः । सिलिकमध्यमासः सं । सिलिकमध्यमास इति सिलिक-मध्यमासः । सꣳ शूरणासः । शूरणासो दिव्यासः । दिव्यासो अत्याः । अत्या इत्यत्याः ॥ हꣳसा इव । इव श्रेणिशः । श्रेणिशो यतंते । श्रेणिश इति श्रेणि-शः । यतंते यत् । यदाक्षिपुः । आक्षिपुर्दिव्यं । दिव्यमज्मं । अज्म-मश्वाः । अश्वा इत्यश्वाः ॥ तव शरीरं । शरीरं पतयिष्णु । पतयिष्ण्वर्वन्न् । अर्वन्तवं । तवं चित्तं । चित्तं वातः । वातं इव । इव ध्रजीमान् । ध्रजीमानिति ध्रजीमान् ॥ तव शृंगाणि । शृंगाणि विष्ठिता । विष्ठिता पुरुत्रा । विष्ठितेति वि-स्थिता । पुरुत्राऽरण्येषु । पुरुत्रेति पुरु-त्रा । अरण्येषु जर्भुराणा । जर्भुराणा चरंति । चरंतीति चरंति ॥ उप प्र ()

काण्ड -4, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। प्रा गात् । अगाच्छसनं । शसनं वाजी । वाज्यवा । अर्वादेवद्रीचा । देवद्रीचा मनसा । देवद्रीचेति देव-द्रीचा । मनसा दीध्यानः । दीध्यान् इति दीध्यानः ॥ अजः पुरः । पुरो नीयते । नीयते नाभिः । नाभिरस्य । अस्यानु । अनु पश्चात् । पश्चात्कवयः । कवयो यंति । यंति रेभाः । रेभा इति रेभाः । उप प्र । प्रागात् । अगा-त्परमं । परमम् यत् । यथ्सधस्थ । सधस्थमर्वान् । सधस्थमिति सध-स्थं । अर्वाꣳ अच्छं । अच्छा पितरं । पितरं मातरं । मातरं च । चेति च ॥ अद्या देवान् । देवाञ्जुष्टतमः । जुष्टतमो हि । जुष्टतम इति जुष्ट-तमः । हि गम्याः । गम्या अथं । अथा । आशास्ते । शास्ते दाशुषे । दाशाषे वार्याणि । वार्याणीति वार्याणि () ॥॥

